सचक्रशङ्खाब्जगदो माधवः श्रीगदाधरः ।
गदाब्जशङ्खचक्री वा गोविन्दोऽर्च्यो गदाधरः ॥
पद्मशङ्खासिगदिने विष्णुरूपाय वै नमः ।
शङ्खाब्जचक्रगदिने नमः सङ्कर्षणाय च ॥
सुशङ्खसुगदाब्जाविष्टते प्रद्युम्नमूर्त्तये ।
नमोऽनिरुद्धाय गदाशङ्खाब्जाविविधारिणे ॥
नमो गदासिशङ्खाब्जयुक्तत्रैविक्रमाय च ।
सासिकौमोदकीपद्मगदिने वामनमूर्त्तये ॥
चक्राब्जशङ्खगदिने नमः श्रीधरमूर्त्तये ।
हृषीकेश साविगदाशङ्खपद्मिन्नमो नमः ॥
साब्जशङ्खगदाचक्रपद्मनाभस्वरूपिणे ।
दामोदर शङ्खगदाचक्रपद्मिन्नमो नमः ॥
साविशङ्खगदाब्जाय वासुदेवाय वै नमः ।
शङ्खाब्जचक्रगदिने नमः सङ्कर्षणाय च ॥
साब्जशङ्खगदाचक्रपुरुषोत्तममूर्त्तये ।
नमोऽधोक्षजरूपाय गदाशङ्खासिपद्मिने ॥
नृसिंहमूर्त्तये पद्मगदाशङ्खाब्जधारिणे ।
पद्माब्जशङ्खगदिने नमोस्त्वच्युतमूर्त्तये ॥
सशङ्खचक्राब्जगदं जनार्द्दनमिहानमे ।
उपेन्द्रं सगदं साविं पद्मशङ्खिन्नमो नमः ।
सुचक्राब्जगदाशङ्खयुक्ताय हरिमूर्त्तये ।
सगदाब्जाविशङ्खाय नमः श्रीकृष्णमूर्त्तये ॥
शालग्रामशिलाद्वारगतलग्नद्विचक्रधृक् ।
शुक्लाभो वासुदेवाख्यः सोऽव्याद्वः श्रीगदाधरः॥
लग्नद्विचक्रो रक्ताभः पूर्वभागे तु पुष्कलः ।
सङ्कर्षणोऽथ प्रद्युम्नः सूक्ष्मचक्रस्तु पीतकः ॥
सदीर्घशुषिरच्छिद्रो योऽनिरुद्धस्तु वर्त्तुलः ।
नीलो द्वारि त्रिरेखश्च अथ नारायणोऽसितः ॥
मध्ये गदाकृती रेखा नाभिचक्रमहोन्नतः ।
पृथुचक्रो नृसिंहोऽथ कपिलोऽव्यात् त्रिबिन्दुकः ॥
अथवा पञ्चबिन्दुस्तत्पूजनं ब्रह्मचारिणः ।
वराहः शक्तिलिङ्गोऽव्याद्विषमद्वयचक्रकः ॥
नीलस्त्रीरेखः स्थूलोऽथ कूर्म्ममूर्त्तिः स बिन्दुमान् ।
कृष्णः सवर्त्तुलावर्त्तः पातु वोन्नतपृष्ठकः ॥
श्रीधरः पञ्चरेखोऽव्याद्वनमाली गदान्वितः ।
वामनो वर्त्तुलो ह्रस्वो वामचक्रः सुरेश्वरः ॥
नानावर्णोऽनेकमूर्त्तिर्नागभोगी त्वनन्तकः ।
स्थूलो दामोदरो नीलो मध्ये चक्रः सनीलकः॥
संकीर्णद्वारको वोऽव्यादथ ब्रह्मा सुलोहितः ।
सदीर्घरेखः शुषिर एकचक्राम्बुजः पृथुः ॥
पृथुच्छिद्रस्थूलचक्रः कृष्णो विष्णुश्च बिन्दुवत् ।
हयग्रीवोऽङ्कुशाकारः पञ्चरेखः सकौस्तुभः ॥
वैकुण्ठो मणिरत्नाभ एकचक्राम्बुजोऽसितः ।
मत्स्या दीर्घोऽम्बुजाकारो द्वाररेखश्च पातु वः॥
वामचक्रो दक्षरेखः श्यामो वोऽव्यात्त्रिविक्रमः।
शालग्रामे द्वारकायां स्थिताय गदिने नमः ॥
एकेन लक्षितो योऽव्याद्गदाधारी सुदर्शनः ।
एकद्वारे चतुश्चक्रं वनमालाविभूषितम् ॥
स्वर्णरेखासमायुक्त गोष्पदेन विराजितम् ।
कदम्बकुसुमाकारं लक्ष्मीनारायणं विदुः ॥
लक्ष्मीनारायणो द्वाभ्यां त्रिभिर्मूर्त्तिस्त्रिविक्रमः
चतुर्भुजश्चतुर्व्यूहो वासुदेवश्च पञ्चभिः ॥
प्रद्युम्नः षड्भिरेव स्यात् सङ्कर्षण इतस्ततः ।
पुरुषोत्तमोऽष्टभिः स्यान्नवव्यूहो नवोन्नतः ॥
दशावतारो दशभिरनिरुद्धोऽवतादथ ।
द्वादशात्मा द्वादशभिरत ऊर्द्ध्वमनन्तकः ।
विष्णोर्मूर्त्तिमयं स्तोत्रं यः पठेत् स दिवं व्रजेत् ॥"

इति गारुड़े ४५ अध्यायः ॥ * ॥

अपरञ्च ।

हरिरुवाच ।

"निर्लक्षणा शुभा स्याच्च चक्राङ्कितशिलार्च्चनात् ।
आदौ सुदर्शनो मूर्त्तिर्लक्ष्मीनारायणोऽपरः ॥
त्रिचक्रोऽसावच्युतः स्यात् चतुश्चक्रश्चतुर्भुजः ।
वासुदेवश्च प्रद्युम्नस्ततः सङ्कर्षणः स्मृतः ॥
पुरुषोत्तमो ह्यष्टमः स्यान्नवव्यूहो दशात्मकः ।
एकादशोऽनिरुद्धः स्याद्द्वादशो द्वादशात्मकः ॥
अत ऊर्द्ध्वमनन्तः स्याच्चक्रै रेकादिकैः क्रमः ।
सुदर्शनाद्या लक्षिताश्च पूजिताः सर्वकामदाः ॥
शालग्रामशिला यत्र देवो द्वारवतीभवः ।
उभयोः सङ्गमो यत्र तत्र मुक्तिर्न संशयः ॥"

इति गारुड़े ६५ अध्यायः ॥*॥

क्षेत्रविशेषः - यथा,—

धरण्युवाच ।

"भगवन् देवदेवेश शालङ्कायनको मुनिः ।
किं चकार तपः कुर्वन् तव क्षेत्रे विमुक्तिदे ॥

वाराह उवाच ।

अथ दीर्घेण कालेन स ऋषिः संशितव्रतः ।
तप्यमानो यथान्यायं पश्यते शालमुत्तमम् ॥
विश्रामं कुरुते तत्र द्रष्टुकामोऽथ मां मुनिः ।
मायया मम मूढ़ात्मा शक्तो द्रष्टुं न मामभूत् ॥
ततः पूर्व्वेण पार्श्वेन तस्य शालस्य सुन्दरि ।
वैशाखमासद्वादश्यां मद्दर्शनमुपागतः ॥
दृष्ट्वा मां तत्र स मुनिस्तपस्वी शंसितव्रतः ।
तुष्टाव वैदिकैः सूक्तैः प्रणम्य च पुनः पुनः ॥
ततोऽहं स्तूयमानो वै ऋषिमुख्येन सुन्दरि ।
प्राप्तोऽस्मि परमां प्रीतिं तमवोचं ततः ऋषिम्
तवाश्रमे महाभाग स्थित्वा त्वं तपसां निधे ।
पुत्त्रेण परमप्रीतो मत्क्षेत्रे मत्समो भव ॥
अन्यच्च गुह्यं वक्ष्यामि शालङ्कायन तच्छृणु ।
तव प्रीत्या प्रवक्ष्यामि शैनैतत् क्षेत्रमुत्तमम् ॥
शालग्राममिति ख्यातं तन्निबोध मुने शुभम् ।
योऽयं वृक्षस्त्वया दृष्टः सोऽहमेव न संशयः ॥
एतत् कोऽपि न जानाति विना देवं महेश्वरम्
एवं तस्मै वरं दत्त्वा शालङ्कायनकाय वै ॥
पश्यतस्तस्य वसुधे तत्रैवान्तर्हितोऽभवत् ।
वृक्षं दक्षिणतः कृत्वा जगाम स्वाश्रमं मुनिः ॥
मम तद्रोचते स्थानं गिरिकूटशिलोच्चये ।
शालग्राम इति ख्यातं भक्तसंसारमोक्षणम् ॥"

इति वाराहे शालग्रामक्षेत्रमाहात्म्यवर्णननामाध्यायः ॥

शालग्रामगिरिः, पुं, ( शालग्रामस्य गिरिः । ) शालग्रामोत्पादकपर्व्वतः । यथा,—

वाराह उवाच ।

"कथयिष्यामि ते गुह्यं शालग्राममिति स्तुतम् ।
तस्मिन् क्षेत्रे हरो देवो मत्स्वरूपेण संयुतः ॥
शालग्रामे गिरौ तस्मिन् शिलारूपेण तिष्ठति ।
अहं तिष्ठामि तत्रैव गिरिरूपेण नित्यता ॥
तस्मिन् शिलाः समग्रास्तु मत्स्वरूपा न संशयः
पूजनीयाः प्रयत्नेन किं पुनश्चक्रलाञ्छिताः ॥
लिङ्गरूपेण तु हरस्तत्र देवालये गिरौ ।
शिवनाभाः शिलास्तत्र चक्रनाभास्तथा शिलाः॥
सोमेश्वराधिष्ठितस्तु शिवरूपो गिरिः स्मृतः ।
शालग्रामगिरिर्विष्णुरहं सोमेश्वराधिपः ॥
तयोः पर्वतयोर्या वै शिला विष्णुशिलाभिधाः ॥
रेवया च कृतं पूर्वं तपः शिवसुतुष्टिदम् ।
मम त्वत्सदृशः पुत्त्रो भूयादभिहितस्तया ॥
अहं कस्यापि न सुतः किं करिष्यामि चिन्तयन् ।
रेवायास्तु वरो देयस्त्ववश्यं मृगलाञ्छन ।
निश्चित्यैवं तदा प्रोक्तं प्रसन्नेनान्तरात्मना ॥
लिङ्गरूपेण ते देवि गजाननपुरस्कृतः ।
गर्भे तव वसिष्यामि पुत्त्रो भूत्वा शिवप्रिये ॥
मम त्वमपरा मूर्त्तिः ख्याता जलमयी शिवा ।
शिवशक्तिविभेदेन आवामेकत्र संस्थितौ ॥
एवं दत्तवरा रेवा मत्सान्निध्यमिहागता ।
रेवाखण्डमिति ख्यातं ततः प्रभृति गोपते ॥*॥
गण्डक्यापि पुरा तप्तं वर्षाणामयुतं विधे ।
शीर्णपर्णाशनं कृत्वा वायुभक्षाप्यनन्तरम् ॥
दिव्यं वर्षशतं तेपे विष्णुं चिन्तयती तदा ।
ततः साक्षाज्जगन्नाथो हरिर्भक्तजनप्रियः ॥
उवाच मधुरं वाक्यं प्रीतः प्रणतवत्सलः ।
गण्डकि ! त्वां प्रसन्नोऽस्मि तपसा विस्मितेऽनघे
अनवच्छिन्नया शक्त्या वरं वरय सुव्रते ।
किं देयं तद्वदस्वाशु प्रीतोऽस्मि वरवर्णिनि ॥
गण्डक्यपि पुरो दृष्ट्वा शङ्खचक्रगदाधरम् ।
दण्डवत् प्रणता भूत्वा ततः स्तोत्रं प्रचक्रमे ॥
अहो देव मया दृष्टो दुर्दर्शो योगिनामपि ।
त्वया सर्व्वमिदं सृष्टं जगत् स्थावरजङ्गमम् ॥
ततो हिमांशे सा देवी गण्डकी लोकतारिणी।
प्राञ्जलिः प्रणता भूत्वा मधुरं वाक्यमब्रवीत् ॥
यदि देव प्रसन्नोऽसि देयो मे वाञ्छितो वरः ।
मम गर्भगतो भूत्वा विष्णो मत्पुत्त्रतां व्रज ॥
ततः प्रसन्नो भगवान् चिन्तयामास गोपते ।
किं याचितं निम्नगया नित्यं मत्सङ्गलुब्धया ॥
दास्यामि याचितं येन लोकानां भवमोक्षणम् ।
इत्येवं कृपया देवो निश्चित्य मनसा स्वयम् ॥
गण्डकीं कथयामास शृणु देवि वचो मम ।
शालग्रामशिलारूपी तव गर्भगतः सदा ॥
तिष्ठामि तव पुत्त्रत्वे भक्तानुग्रहकारणात् ।
मत्सान्निध्यान्नदीनां त्वमतिश्रेष्ठा भविष्यसि ॥
दर्शनात् स्पर्शनात् स्नानात् पानाच्चैवावगाहनात् ।